दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णचतर्दशी
आषाढः 29 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-261 | 1 | जुलाई 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले भूस्खलनम्- किन्नौरक्षेत्रे पर्वतात् पतिताः बृहदाकाराः शैलाः, राष्ट्रियमार्ग-पञ्च अवरुद्धः

3 हमटायां (मनाली) चतुर्विंशतिवर्षानन्तरं भगवान् श्रृङ्गिऋषिमहाराजस्य महर्षेः जमदग्नेः (जमलूदेवस्य) च दिव्य-महासमागमः सम्पन्नः

5 कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये १५ जुलाई दिनाङ्के 'महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्कार' समारोहः

# श्रम-रोजगारमन्त्री डॉ. मनसुख माण्डविया मंगलवासरे कर्मचारी-राज्यबीमा-ईएसआई स्वास्थ्यपरियोजनानाम् आरम्भं करिष्यति



श्रम-रोजगारमन्त्री डॉ. मनसुख माण्डविया मंगलवासरे देशे सर्वत्र सप्त कर्मचारीराज्यबीमा-ईएसआई स्वास्थ्यपरियोजनानाम् आरम्भं करिष्यति, येषु प्रायः ६६८ कोटिरूप्यकाणां व्ययः भविष्यति। एतेषु परियोजनासु तेलङ्गानाप्रदेशस्य सनतनगरस्य ईएसआईसी-चिकित्सालयस्य नूतनः ओपीडी-खण्डः, असम-प्रदेशस्य बेल्टोला-नगरस्य उन्नयनं २०० शय्यायुक्तं ईएसआईसी-चिकित्सालयम्, तमिलनाडु-राज्यस्य श्रीपेरुम्बुदुर-नगरस्य १०० शय्यायुक्तं ईएसआईसी-चिकित्सालयं च सन्ति । आन्ध्रप्रदेशस्य राजमहेन्द्रवरामस्य ईएसआईसी-चिकित्सालयः, गुजरातस्य सुरेन्द्रनगरे ईएसआई-औषधालयः शाखाकार्यालयः, कोटा-नगरस्य उद्योगनगरे च ईएसआई-औषधालयः शाखाकार्यालयः च, तथैव राजस्थानस्य भवानी-मण्डी-नगरस्य ईएसआई-औषधालयः च सन्ति । श्रम-रोजगारमन्त्रालयेन उक्तं यत् डॉ. माण्डविया सनतनगरे ईएसआईसी-अस्पतालस्य नूतनस्य ओपीडी-खण्डस्य उद्घाटनं करिष्यति, शेषट् परियोजनानां उद्घाटनं ऑनलाइन-रूपेण भविष्यति। मन्त्रालयेन उक्तं यत् एताः स्वास्थ्यसेवासुविधाः देशे सर्वत्र प्रायः ५३ लक्षं लाभार्थीनां चिकित्सा आवश्यकतानां पूर्तिं करिष्यन्ति। अस्मिन् अवसरे डॉ. माण्डविया सनतनगरस्य ईएसआईसी-चिकित्सालयस्य ओपीडी-खण्डस्य विकासे योगदानं दत्तवन्तः निर्माणकर्मचारिणः सहितं राष्ट्रनिर्माणे योगदानं दत्तवन्तः निर्माणकर्मचारिणः सम्मानं करिष्यति। अस्मिन् कार्यक्रमे श्रम-रोजगारराज्यमन्त्री शोभा करंदलाजे अपि उपस्थिता भविष्यति।

## कतर-देशस्य पूर्व-अमीर-शेख-हमद-बिन-खलीफा-अल-थानी-महोदयस्य निधने भारते राष्ट्रीयशोकः घोषितः, भारतपक्षतः कतरं गमिष्यति केन्द्रीयमन्त्री किरेन रिजिजू



भारतदेशेन कतर-देशस्य पूर्व-अमीर-शेख-हमद-बिन-खलीफा-अल-थानी-महोदयस्य निधने श्रद्धाञ्जलिं समर्पयता अद्य एकदिवसीयः राष्ट्रीयशोकः घोषितः अस्ति। ह्यः कतर-देशस्य पूर्व-अमीर-शेख-हमद-बिन-खलीफा-अल-थानी-महोदयस्य निधनम् अभवत्। शोकदिवसे देशे तेषु सर्वेषु भवनेषु राष्ट्रध्वजः अर्धझुकितः (अर्धनामितः) स्थास्यति यत्र नियमितरूपेण राष्ट्रध्वजः उड्डीयते। अद्य किमपि आधिकारिकं मनोरञ्जनकार्यक्रमं न भविष्यति।प्रधानमन्त्री नरेन्द्रमोदी पूर्व-अमीर-शेख-हमद-बिन-खलीफा-अल-थानी-महोदयस्य निधने शोकं प्रकटयन् अवदत् यत् सः एकः दूरदर्शी नेता आसीत्, येन कतर-देशः विकासस्य समृद्धेः च नूतनशिखरं प्रापितः।विदेशमन्त्रालयेन एकेन वक्तव्येन उक्तं यत् संसदीयकार्य-अल्पसंख्यककार्यमन्त्री किरेन रिजिजू भारतसर्वकारस्य पक्षतः कतर-देशाय शोकं प्रकटयितुं तत्र गच्छन् अस्ति।

## वियतनामदेशे नौकादुर्घटनायां मृतानां १५ भारतीयनागरिकानां मृतशरीराणि आवश्यकानि औपचारिकतानि पूर्णानि कृत्वा यथाशीघ्रं भारतं प्रति प्रेषितानि भविष्यन्ति - भारतीयदूतावासः।



वियतनामदेशे भारतीयदूतावासेन घोषितं यत् फु क्वोक द्वीपस्य समीपे नौकादुर्घटनायां मृतानां १५ भारतीयनागरिकानां शवः हो ची मिन्ह नगरं प्रति प्रेष्यते । दूतावासेन उक्तं यत् आवश्यकानि औपचारिकतानि पूर्णानि कृत्वा यथाशीघ्रं शवः भारतं प्रति प्रेषिताः भविष्यन्ति। दूतावासेन उक्तं यत् होची मिन्ह-नगरे भारतीय-महावाणिज्यदूतावासः वियतनाम-अधिकारिभिः सह निरन्तरं सम्पर्कं कुर्वन् अस्ति, तथा च शवानां भारतं प्रति शीघ्रं प्रत्यागमनाय सर्वाणि सम्भवं सहायतां प्रयच्छति। दूतावासेन घोषितं यत् नौकादुर्घटनायां घातिताः १५ भारतीयाः चिकित्सां कृत्वा चिकित्सालयात् मुक्ताः भूत्वा भारतं प्रत्यागच्छन्ति। दूतावासस्य अनुसारं गम्भीररूपेण घातितयोः एकः चिकित्सालयात् मुक्तः भूत्वा भारतं प्रत्यागच्छति, अपरः वियतनामदेशस्य फु क्वोक-नगरस्य चिकित्सालये चिकित्सां कुर्वन् अस्ति।

## सुभाषितम्

**अतिथिं यः समभ्यर्च्य,**
**प्रीयमाणेन चेतसा।**
**तस्य नश्यन्ति पापानि,**
**सुकृतं चोपजायते॥**

अर्थात्- जो मनुष्य अपने घर आए हुए अतिथि का प्रसन्न मन से स्वागत और सत्कार करता है, उस मनुष्य के सभी संचित पाप नष्ट हो जाते हैं और उसके जीवन में महान पुण्य (सुकृत) का उदय होता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## युवाकार्य-खेलमन्त्रालयेन 'नशामुक्तयुवा विकसितभारतम्' अभियानस्य नूतनचरणं प्रारब्धम्



युवाकार्य-खेलमन्त्रालयेन 'मेरा युवा भारत' (माय भारत) इत्यस्य माध्यमेन राष्ट्रव्यापिनः 'नशामुक्तयुवा विकसितभारतम्' अभियानस्य अग्रिमचरणस्य शुभारम्भः कृतः अस्ति। अस्य अन्तर्गतं प्रतियोगिताः त्रिषु चरणेषु आयोजयिष्यन्ते। एषा प्रतियोगिता जिलास्तरे, राज्यस्तरे, राष्ट्रियस्तरे च आयोजिता भविष्यति। मन्त्रालयस्यानुसारं पञ्जीकरणम् अद्य आरभ्य 'माय भारत' पोर्टल् (जालपुटे) प्रारभ्यते। जिलास्तरस्य विजेतारः राज्यस्तरीये चयनप्रक्रियायां प्रतिस्पर्धां करिष्यन्ति। राज्यस्तरस्य विजेतारः १२, १३ अगस्त दिनाङ्कयोः राष्ट्रिययुवाशिखरसम्मेलनाय नई दिल्लीं प्रति आमन्त्रयिष्यन्ते। 'माय भारत' पञ्चसु रचनात्मकश्रेणीषु – नृत्यं, सङ्गीतं, रील्-लघुचलच्चित्रं, नुक्कड़-नाटकं, स्लैम-कविता च – प्रतियोगितानां आयोजनं करिष्यति। एताः प्रतियोगिताः १५ तः २९ वर्षपर्यन्तं वयसः युवान् उद्दिश्य भविष्यन्ति। युवानः स्वकृतयः हिन्दी-आङ्ग्ल-अथवा कस्यामपि क्षेत्रीयभाषायां प्रस्तुतुं शक्नुवन्ति।

# हिमाचले भूस्खलनम्- किन्नौरक्षेत्रे पर्वतात् पतिताः बृहदाकाराः शैलाः, राष्ट्रियमार्ग-पञ्च अवरुद्धः



**हिमसंस्कृतवार्ताः- किन्नौरम्।**
हिमाचलप्रदेशस्य किन्नौरमण्डले 'रल्ली' क्षेत्रस्य अन्तिके 'लाल ढाङ्क' इति पर्वतेभ्यः बृहदाकाराः शैलाः पतिताः। अस्मात् भूस्खलनात् राष्ट्रियमार्ग- पञ्च पूर्णतया अवरुद्धः जातः। यातायातव्यवस्थायाः स्थगनेन मार्गस्य द्वयोः पार्श्वयोः महती वाहनावलिः संजाता। भूस्खलनस्य एषा घटना रविवासरे सायं ५:०० वादने अभवत्। सम्प्रति प्रशासनं राष्ट्रियमार्गस्य पुनःसञ्चालनाय कार्ये संलग्नः अस्ति।

### इशशिमलायाः 'कार्ट रोड' मार्गे मलिनावशेष-
## वृक्षपातेन यातायातम् अवरुद्धम्

१२ जुलाई दिनाङ्के शिमलानगरस्य जीवनरेखा इति मन्यमाने 'कार्ट रोड' मार्गे यातायातं कतिपयघण्टाः यावत् स्थगितम् आसीत्। हिमाचलप्रदेश-काङ्ग्रेसमुख्यालयस्य अन्तिके मलिनावशेषस्य (मृत्तिकाप्रस्तराः) एकस्य विशालवृक्षस्य च पतनात् मार्गः पूर्णतया अवरुद्धः अभवत्। एषा घटना रविवासरस्य प्रभाते घटिता, यस्मात् परं मण्डलाप्रशासनस्य आरक्षिदलस्य च गणाः घटनास्थलं सम्प्राप्ताः।अधिकारिभिः महतीनां यन्त्राणां (मशीनरी) साहाय्येन मार्गस्य स्वच्छताकार्यम् आरब्धम्। अस्य प्रमुखस्य मार्गस्य द्वयोः अपि भागयोः (कैरिजवे) वाहनानि अवरुद्धानि आसन्। वाहनानि कश्चित् कालार्थं शिमला-बायपास् मार्गेण वैकल्पिकमार्गेषु प्रेषितानि। यद्यपि वृष्टिकारणात् मार्गाः पिच्छिलाः आसन्, रविवासरस्य यातायातकारणात् वैकल्पिकमार्गे अपि महान् यानसम्मर्दं संजातम्। अनेन यात्रिकाः अतीव असुविधायाः सम्मुखीकरणं कृतम्।

## यातायातस्य उपरि प्रभावः-

कार्ट-रोडमार्गे यातायातस्य स्थगनेन नगरस्य विभिन्नेषु भागेषु आवागमनं प्रभावितम् अभवत्। बहुभ्यः यात्रिकेभ्यः स्वगन्तव्यं प्राप्तुं सामान्यात् अधिकः समयः अभवत्। स्थानीयनिवासिनः पर्यटकाश्च उभये अपि समस्यां प्राप्तवन्तः। प्रशासनेन जनेभ्यः धैर्यस्थापनार्थं वैकल्पिकमार्गाणाम् उपयोगार्थं च प्रार्थना कृता।

## प्रदेशे पञ्चदिनानि यावत् वृष्टेः सतर्कता

हिमाचलप्रदेशे मानसून-ऋतोः प्रभावः आगामिषु कतिपयेषु दिनेषु अपि स्थास्यति इति आशा अस्ति। ऋतुविज्ञानकेन्द्र-शिमलाद्वारा प्रसारितेन नूतनेन पूर्वानुमानस्य अनुसारेण १२ तः १६ जुलाई पर्यन्तं प्रदेशस्य अधिकांशभागेषु मन्दतः मध्यमा वृष्टिः भवितुं सम्भावना वर्तते। यद्यपि मण्डी, कुल्लू, काङ्गड़ा, चम्बामण्डलेषु केषुचित् स्थानेषु मध्यमतः प्रचण्डवृष्टिः अपि भवितुं शक्नोति।

### स्तनित- विद्युत्पात-तीव्रवायूनां पूर्वानुमानम्

ऋतुविज्ञानविभागेन विशेषरूपेण १२ जुलाई दिनाङ्के प्रदेशस्य बहुषु भागेषु स्तनित-विद्युत्पातः, ३० तः ४० किलोमीटर प्रतिघण्टा वेगेन तीव्रवायूनां च चलनस्य सचेतना प्रसारिता अस्ति। किन्नौर- लाहौलस्पीति सदृशेषु उच्चपर्वतीयक्षेत्रेषु अपि तीव्रवायूनां चलनस्य पूर्वानुमानं वर्तते, यत् यात्रिकेभ्यः अतिरिक्तायाः सावधानतायाः सङ्केतः अस्ति।

## सक्रियः स्थास्यति प्रावृट्कालः

आगामि-सप्तदिनानां पूर्वानुमानस्य अनुसारं समतल-मध्य- उच्चपर्वतीयक्षेत्रेषु भिन्नेषु दिनेषु मन्दतः मध्यमा वृष्टिः निरन्तरं प्रचलिष्यति। १७ तथा १८ जुलाई दिनाङ्कयोः अपि प्रदेशस्य बहुषु क्षेत्रेषु वृष्टेः गतिविधयः स्थातुं सम्भावना अस्ति, यस्य अर्थः अस्ति यत् मानसूनस्य सक्रियता अधुना अपि स्थास्यति।

## प्रशासनस्य प्रार्थना

ऋतुविज्ञानविभागेन प्रचण्डवृष्टियुक्तेषु क्षेत्रेषु स्थानीयभूस्खलनं, जलमग्नता (जलभराव), पिच्छिलमार्गाः, न्यूनदृश्यता तथा च यातायातस्य अवरोधः सदृशीनां सम्भाव्यस्थितीनां प्रति सचेतितम् अस्ति। एतान् सङ्कटान् दृष्ट्वा जनेभ्यः प्रार्थना कृता यत् ते नदी-उपनदीभ्यः दूरे तिष्ठेयुः, अनावश्यकयात्रां वर्जयेयुः, प्रशासनेन प्रसारितानां परामर्शाणां दृढतया अनुपालनं च कुर्युः। एतत् सुनिश्चितं करणीयम् अतीव आवश्यकं यत् सर्वे नागरिकाः सुरक्षिताः भवेयुः कस्यापि अप्रियघटनायाश्च रोधं कर्तुं शक्येत।

# पर्वतेषु प्रकृतेः प्रकोपः- उत्तराखण्डे ९१ मार्गाः रुद्धाः, काश्मीरे मेघविस्फोटः; हिमाचले प्रचण्डवृष्टेः सतर्कता

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।उत्तरभारतस्य पर्वतीयाः प्रदेशाः अस्मिन् काले मानसून-प्राकृतिक-आपद्भ्यां दोलायमानाः सन्ति। हिमाचलप्रदेशे, उत्तराखण्डे, जम्मू-काश्मीरे (घाटी) च प्रचण्डवृष्टेः, भूस्खलनस्य, मेघविस्फोटस्य च घटनाभिः जनजीवनं पूर्णतया विपर्यस्तं संजातम्। नद्यः उद्वेगे वहन्ति, प्रमुखाः राष्ट्रियमार्गाः आरभ्य शतशः सम्पर्कमार्गाः पिहिताः सन्ति, जनाश्च निरन्तरं मलिनावशेष भूस्खलनस्य च भयच्छायायां जीवनं यापयितुं विवशाः सन्ति। बिन्दन्तीं स्थितिं दृष्ट्वा ऋतुविज्ञानविभागेन स्थानीयप्रशासनेन च उच्चसतर्कता (हाई अलर्ट) प्रसारिता।

### काश्मीरम्- अनन्तनाग-पहलगामक्षेत्रयोः मेघविस्फोटेन विनाशः, प्रशासनं सर्तकमुद्रायाम्

दक्षिणकाश्मीरे प्रकृतेः रौद्ररूपं दृष्टं, यत्र द्वयोः भिन्नयोः प्रसिद्धक्षेत्रयोः अकस्मात् मेघविस्फोटात् नदी-उपनदेषु भयङ्करः जलप्रवाहः (सैलाब) आगतः।

## अकस्मात् आगतः जलप्रवाहः

प्रथमा घटना अनन्तनागमण्डलस्य 'चित्रगुल' इत्यस्य उच्चपर्वतीयक्षेत्रेषु अभवत्, येन 'नाला आरपत चित्रगुल




शाङ्गस' इत्यस्मिन् अकस्मात् जलोप्लवः आगतः। तस्य सद्यः परमेव पर्यटनस्थले पहलगामस्य 'नाला आवूरा' इत्यस्मिन् अपि मेघविस्फोटः जातः, येन जलस्तरः भयानकवेगेन प्रवृद्धः।

### भोजनशालासु (होटलेषु) पर्यटकेषु च कोलाहलः

मलिनातिशयेन जलस्य तीव्रप्रवाहं दृष्ट्वा निम्नक्षेत्रेषु तटेषु च कश्चित् कालार्थं भयपूर्णं वातावरणं निर्मितम्। सौभाग्येन पहलगामतटे स्थितासु प्रमुखासु भोजनशालासु तिष्ठन्तः देश-विदेशस्य सर्वे पर्यटकाः सुरक्षितरूपेण सन्ति।

## प्रशासनिकसज्जता:-

आपदाप्रबन्धन-आरक्षि-राजस्वविभागाः पूर्णतया सतर्कमुद्रायां स्थापिताः सन्ति। सङ्कटपूर्णेषु निम्नक्षेत्रेषु च रक्षण-निरीक्षणदलानि नियुक्तानि।

### उत्तराखण्डः- ९१ मार्गाः रुद्धाः, ११ सेतवः जलाशयाश्च सङ्कटबिन्दोः अन्तिके-

उत्तराखण्डे भूस्खलनकारणात् सम्पर्कमार्गाः पूर्णतया भग्नाः सन्ति। राज्ये एकः राष्ट्रियमार्गः द्वौ राज्यमार्गौ (स्टेट हाईवे) च सम्मिलितं कृत्य कुलं ९१ प्रमुखाः मार्गाः अवरुद्धाः सन्ति, येन आवागमनं बाधितं जातम्।

## सर्वाधिकप्रभावितानि मण्डलानि-

लोकनिर्माणविभागः (लोनिवि) मार्गान् उद्घाटयितुं प्रयतते, परन्तु निरन्तरं पतता मलातिशय- कारणात् विघ्नः जायते। सर्वतः दुरवस्था पौड़ीगढ़वाले (२१ मार्गाः रुद्धाः) चमोलीमण्डले (१९ मार्गाः रुद्धाः) च वर्तते। एतदतिरिच्य टिहरीक्षेत्रे १७ पिथौरागढ़े च १० मार्गाः पिहिताः सन्ति।

## नदीनां वर्धमानः जलस्तरः-

राज्यस्य ११ जलाशयेषु सेतुषु च जलस्तरः सङ्कटबिन्दोः अत्यन्तं समीपम् सम्प्राप्तः। उत्तरकाश्यां भागीरथी नदी, कोटेश्वर-रुद्रप्रयागे अलकनन्दा (बदरीनाथसमीपे) इत्यस्याः जलस्तरः वेगेन प्रवृद्धः, यद्यपि पश्चात् अस्मिन् स्वल्पा न्यूनता अङ्किता। ऋषिकेशे हरिद्वारे च गङ्गायाः जलस्तरः सम्प्रति घटते, परन्तु सङ्कटः अद्यापि न टलितः।

# अक्षोट-वाताद-निकोचकैः (अखरोट- बादाम- चिलगोजा) वर्धिष्यते कृषकाणाम् आयः, 'हाई वैल्यू नट मिशन' इति आरप्स्यते राज्यसर्वकारः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य उद्यानकृषिक्षेत्रं (बागवानी) सशक्तं विधातुं कृषकाणाम् आयं वर्धयितुं च उद्देश्यात् राज्यसर्वकारः वर्षं २०२६ तः २०३१ पर्यन्तं 'हाई वैल्यू नट मिशन' (उच्चमूल्यवान् दृढ़फल अभियानम्) इत्यस्य आरम्भं विधास्यति। अस्य अभियानस्य अन्तर्गतम् अक्षोटं (अखरोट), वातादं (बादाम), उरुमाणं (खुमानी), निकोचकं (चिलगोजा) सदृशीनाम् उच्चमूल्ययुक्तानां समशीतोष्णाणां दृढ़फल-सस्यानां कृषये प्रोत्साहनं प्रदास्यते। एतत् अभियानम् उद्यानकृषिक्षेत्रस्य सम्मुखे स्थितानां प्रमुखानाम् आह्वानानां, यथा- पुरातनानि उद्यानानि, न्यूना उत्पादकता, कर्तन- उपरान्तं पर्याप्त-आधारभूतसंरचनायाः शून्यता, मूल्यसंवर्धनस्य सीमिताः अवसराः, इत्येतेषां समाधानं विधास्यति। अस्य उद्देश्यं वैज्ञानिक- उद्यानप्रबन्धनस्य, आधुनिक-अधोसंरचनायाः तथा च श्रेष्ठविपणि-प्राप्तेः (मार्केट एक्सेस) माध्यमेन उद्यानकृषेः शाश्वतविकासाय सुदृढ़- पारिस्थितिकी-तन्त्रस्य (इकोसिस्टम्) सज्जता वर्तते।

## सहस्र-हेक्टेयर-परिमितं क्षेत्रं नवीनकरणाय चयनितम्

अभियानस्य अन्तर्गतं प्रायः १,००० हेक्टेयर- परिमितं क्षेत्रम् उद्यानानां कायाकल्पाय उच्चघनत्व- पौधारोपणाय च समाविष्टं करिष्यते। एतेषु ९०० हेक्टेयर-परिमितं पुरातनम् अल्पोत्पादनयुक्तं च उद्यानक्षेत्रं वैज्ञानिकविधिभिः पुनरुज्जीवितं विधास्यते। एतदर्थं कैनोपी-प्रबन्धनं, टॉप-वर्किंग, पुरातनानाम् अनुपयोगिनां च वृक्षाणां प्रतिस्थापनं, मृत्तिकास्वास्थ्ये सुधारः, जलप्रबन्धनं सदृशीनाम् आधुनिकानां प्रविधीनाम् उपयोगः करिष्यते। एतदतिरिच्य, १०० हेक्टेयर-परिमितक्षेत्रे आदर्श- उच्चघनत्वयुक्ताः उद्यानाः विकसिताः भविष्यन्ति, यत्र उच्चगुणवत्तायुक्ताः सस्यसामग्र्यः, सूक्ष्मसिञ्चनम् (माइक्रो इरिगेशन), ऋतु-अनुकूलकृषेः प्रविधयः अन्याश्च आधुनिकाः कृष्युपायाः अङ्गीकरिष्यन्ते।

## चतस्रः उच्चतकनीकयुक्ताः शालाः स्थापयिष्यन्ते

राज्यसर्वकारः प्रमाणित-रोगमुक्त-सस्यसामग्रीणाम् उपलब्धतां सुनिश्चितां कर्तुं प्रमु्ुखेषु दृढ़फल-उत्पादकक्षेत्रेषु चतस्रः उच्चतकनीकयुक्ताः शालाः (हाई-टेक नर्सरियां) तथा च द्वौ उत्कृष्टताकेन्द्रौ स्थापयिष्यति। एताः संस्थाः अनुसन्धानस्य, प्रशिक्षणस्य, प्रदर्शनस्य, विस्तारसेवानामपि केन्द्राणि भूत्वा कार्यं विधास्यन्ति, येन उद्यानिनः आधुनिक- उद्यानप्रबन्धन- प्रविधीन् अङ्गीकृत्य उत्पादकतां वर्धयितुं शक्ष्यन्ति। मूल्यशृङ्खलां सुदृढां विधातुं विपणौ च प्रतिस्पर्धात्मकक्षमतां वर्धयितुम् अस्य अभियानस्य अन्तर्गतं १० आधुनिकानां सङ्ग्रह-वर्गीकरण-चयन-पैकेजिङ्ग-प्रसंस्करण एवं मूल्यसंवर्धन-एककानां स्थापना विधास्यते। एताभिः सुविधाभिः कर्तन-उपरान्तं जायमानायाः क्षतेः न्यूनीकरणं भविष्यति, उत्पादानां गुणवत्ता श्रेष्ठा स्थास्यति कृषकेभ्यश्च श्रेष्ठा विपणिः (मार्केट) उपलप्स्यते।

## जनजातीयक्षेत्रेषु निकोचकस्य (चिलगोजा) संरक्षणं प्राधान्येन

अभियानस्य अन्तर्गतं कृषक-उत्पादक-सङ्घटनानि प्रवर्धिष्यन्ते, सार्वजनिक- निजी- सहभागिता-प्रतिरूपेण निजी-निवेशः प्रोत्साहितः करिष्यते तथा च कृषि-अधोसंरचना-निधिः सदृशीनां योजनानां अन्तर्गतं वित्तीयसंस्थासु कृषकाणां प्राप्तिः सुगमा विधास्यते। निकोचकस्य (चिलगोजा) पारिस्थितिकम् आर्थिकं च महत्त्वं ध्यात्वा अस्य अभियानस्य अन्तर्गतं जनजातीयक्षेत्रेषु अस्य संरक्षणाय पुनरुज्जीवनाय च विशेषप्राधान्यं प्रदास्यते। एतदर्थं प्राकृतिकपुनर्जननस्य प्रोत्साहनं, समुदाय- आधारितं वनप्रबन्धनं, निकोचक-बीजानाम् अङ्कुरणार्थं विशेषविस्तारसुविधानां स्थापना सदृशाः उपायाः करिष्यन्ते। अनेन जैवविविधतायाः संरक्षणेन सह स्थानीयसमुदायानां कृते स्थायी-आजीविकायाः अवसराः अपि सृजिताः भविष्यन्ति।
मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन प्रतिपादितं यत् 'हाई वैल्यू नट मिशन' हिमाचलप्रदेशस्य उद्यानकृषिक्षेत्रे विकासस्य, विविधीकरणस्य, आधुनिकीकरणस्य च नूतनयुगस्य आरम्भं विधास्यति। तेन प्रोक्तं यत् राज्ये समशीतोष्ण-दृढ़फल-सस्यानां कृषेः अपाराः सम्भावनाः सन्ति एतत् अभियानं च आधुनिकप्रविधेः, गुणवत्तापूर्ण-सस्यसामग्रीणां, श्रेष्ठ-आधारभूतसंरचनायाः माध्यमेन कृषकान् एतासां सम्भावनानां पूर्णलाभं प्राप्तुं सक्षमान् विधास्यति। मुख्यमन्त्रिणा कथितं यत् एषा प्रचेष्टा उत्पादकतायां लाभप्रदतायां च उल्लेखनीयां वृद्धिं विधास्यति ग्रामीणयुवकेभ्यश्च रोजगारस्य नूतनावसरान् सृजति, येन ग्रामीण-अर्थव्यवस्था सुदृढा भविष्यति। तेन उक्तं यत् राज्यसर्वकारः उद्यानकृषिं सुदृढं, प्रविधि-आधारितं, विपणि- उन्मुखं च क्षेत्ररूपेण विकसितुं कटिबद्धः अस्ति।मुख्यमंत्रीमहोदयेन प्रतिपादितं यत् अभियानस्य अन्तर्गतम् उद्यानानां कायाकल्पे, मूल्यसंवर्धने, ब्रॉन्डिङ्ग इत्यस्मिन्, निर्यातप्रवर्धने च विशेषं ध्यानं प्रदास्यते, येन उद्यानिभ्यः स्वकीय-उपजस्य श्रेष्ठं मूल्यं प्राप्स्यते। तेन कथितं यत् निकोचक- संरक्षणद्वारा महिलानां, जनजातीयसमुदायानां, कृषक- उत्पादक- सङ्घटनानां च कृते लक्षितसाहाय्यस्य माध्यमेन समावेशी शाश्वतविकापश्च सुनिश्चितः भविष्यति, येन हिमाचलप्रदेशस्य सहस्रशः उद्यानिपरिवाराः प्रत्यक्षलाभं प्राप्स्यन्ति।

# हमटायां (मनाली)

## चतुर्विंशतिवर्षानन्तरं भगवान् श्रृङ्गिऋषिमहाराजस्य महर्षेः जमदग्नेः (जमलूदेवस्य) च दिव्य-महासमागमः सम्पन्नः



**हिमसंस्कृतवार्ताः- रूपेन्द्र वशिष्ठः।** हमटायाः पुण्यभूमौ एकं दिव्यम् अलौकिकं च दृश्यं साकारमभवत्। चतुर्विंशतिवर्षाणां दीर्घान्तरालानन्तरं श्रद्धाकेन्द्रभूतयोः भगवतः श्रृङ्गिऋषिमहाराजस्य, महातपस्विनः महर्षेः जमदग्नेः (जमलूदेवस्य) च दिव्य-महासमागमः सम्पन्नः। अस्य ऐतिहासिकस्य आध्यात्मिकस्य च अस्य महोत्सवस्याय साक्षीभवितुं पञ्चकोठीक्षेत्रात्, चतुर्विंशतिकोठी-सराजक्षेत्राच्च सहस्रशः श्रद्धालवः समागताः।

## पौराणिकप्रसङ्गः- *आसुरीशक्तीनां विनाशः धर्मस्य च प्रतिष्ठापनम्*

पुरातनजनश्रुतिषु प्रसिद्धम् अस्ति यत् आदिकाले अस्यां उपत्यकायाम् आसुरीशक्तीनाम् अत्याचारः वर्धितः। तदा परमसिद्धौ महर्षिः श्रृङ्गिः- महर्षिः जमदग्निः अनयोः स्वीयतपोबल-मन्त्रशक्तिभ्यां ताः दुष्टशक्तीः समूलं विनाश्य धर्मस्य, सत्यस्य, लोककल्याणस्य च प्रतिष्ठापनम् अकुरुताम्। तस्यैव दिव्यविजयस्य स्मृत्यर्थम् अद्यापि भगवान् श्रृङ्गिऋषिः स्वीयया अर्धाङ्गिन्या माता शान्तया सह एतां पवित्रां देवयात्रां निर्वहति।

## हमटा (मनाली) देवकलायाः आद्युत्पत्तिस्थलम् तथा 'देवपरामर्शस्य' महत्त्वम्

लोकपरम्परानुसारं महर्षेः जमदग्नेः देवकलायाः आद्युत्पत्तिस्थलं हमटा एव मन्यते। अत्र अवतीर्य ततः सा देवकला मलाणा-प्रदेशं प्रति प्रस्थिता इति विश्वासः। अतः भगवान् श्रृङ्गिऋषिमहाराजस्य कृते हमटा परमपवित्रं विशेषमहत्त्वयुक्तं च स्थलम् अस्ति। अत्र आगत्य भगवान् स्वगुरमाध्यमेन (देववक्ता) देवपरामर्शं भविष्यवाणीं च प्रददाति। तेन क्षेत्रस्य सुखसमृद्धिः, प्रकृतिसंरक्षणम्, धर्मपालनं समाजस्य च हिताय आवश्यकं मार्गदर्शनं प्रदीयते।
अयं दिव्य-महासमागमः केवलं धार्मिकपरम्परायाः प्रतीकः न, अपि तु हिमाचलप्रदेशस्य समृद्धदेवसंस्कृतेः, लोकश्रद्धायाः सनातनपरम्परायाश्च जीवन्मानं प्रतीकम् अस्ति।

# 'राममन्दिरन्यासं भङ्गं कृत्वा सर्वोच्च- न्यायालयस्य निरीक्षणे भवेत् अन्वेषणम्'- शोभा ओझा



**हिमसंस्कृतवार्ताः- धर्मशाला।** महिलाकाङ्ग्रेसस्य पूर्वा राष्ट्रिया अध्यक्षा शोभा ओझा महोदया राममन्दिरन्यासं (राम मंदिर ट्रस्ट) भङ्गं कृत्वा मन्दिरनिमाणे धनसङ्ग्रहे च कथित- अनियमिततानां सर्वोच्चन्यायालयस्य निरीक्षणे न्यायिकावेषणं करणीयम् इति याचनां कृतवती। तया कथितं यत् श्रीरामस्य नाम्नि राजनीतिं कुर्वन्तः अधुना भगवता श्रीरामेण एव निमज्जयिष्यन्ते। धर्मशालायां रविवासरे आयोजितायां पत्रकारगोष्ठ्यां शोभा ओझा अवदत् यत् पूर्वम् आक्रमणकारिणः देशस्य मन्दिराणि लुण्ठन्ति स्म, परन्तु अधुना मन्दिराणां कथितं लुण्ठनं तेषां स्वकीयाः कर्तारः एव कुर्वन्तः सन्ति। तया आरोपः कृतः यत् न्यासद्वारा विशेषान्वेषणदलस्य सङ्घटनेन तथ्येषु आवरणं न स्थापयितुं शक्यते। कोटिरूप्यकाणां कथितघोटालायाः निष्पक्षम् अन्वेषणं सर्वोच्चन्यायालयस्य निरीक्षणे निर्मितसमित्या कारणीयम्।

### सामान्य-प्रशासनिक-त्रुटिः नास्ति एषः विषयः-

तया प्रतिपादितं यत् श्रीरामजन्मभूमि- तीर्थक्षेत्र- न्यासस्य तत्कालीन-महासचिवस्य चम्पतरायस्य न्यासिनः (ट्रस्टी) अनिलमिश्रस्य च त्यागपत्राणि (इस्तीफे) अस्य विषयस्य सङ्केताः सन्ति यत् एतद् प्रकरणं सामान्य-प्रशासनिक-त्रुटिः नास्ति, अपि तु गम्भीराणाम् अनियमिततानां वर्तते। तया आरोपः कृतः यत् न्यासस्य प्रशासनिकसंरचनायां शीर्षनियुक्तिषु च केन्द्रसर्वकारस्य भूमिका आसीत्, अतः सर्वकारः स्वकीयाद् उत्तरदायित्वात् पलायितुं न शक्नोति।

### सूचनाधिकार-अधिनियमस्य (RTI) परिधेः बहिः किमर्थं स्थापितः न्यासः?

शोभा ओझा महोदया प्रश्नम् उत्थापितवती यत् न्यासं सूचनाधिकार-अधिनियमस्य परिधेः बहिः स्थापयितुम् आवश्यकता किमर्थं जाता। तया आरोपः विहितः यत् न्यासस्य अधिकांशसदस्यानां नियुक्तिः भाजपासर्वकारस्य कार्यकाले अभवत्, एतादृश्याम् स्थितौ प्रधानमन्त्रिणा नरेन्द्रमोदिना अपि अस्मिन् विषये उत्तरं दातव्यम्। काङ्ग्रेसनेत्री पक्षं कृतवती यत् राममन्दिरसम्बद्धस्य कथित-भ्रष्टाचारस्य सन्दर्भे बह्व्यः गुप्तचर-आख्याः प्रधानमन्त्रिणं प्रति प्रेषिताः, परन्तु तासाम् उपरि कापि कार्यविधिः न कृता। तया कथितं यत् भगवान् श्रीरामः कोटिशः जनानाम् आस्थायाः केन्द्रम् अस्ति, तस्य नाम्नि सङ्गृहीतस्य धनस्य दुरुपयोगस्य आरोपाणां निष्पक्षान्वेषणं देशहिताय जनभावनानां सम्मानाय च अतीव आवश्यकं वर्तते।

# हिमाचलप्रदेशः- आगामि-पञ्चदिनानि यावत् प्रचण्डवृष्टेः सचेतना-



हिमाचलप्रदेशे अपि मानसूनस्य सक्रियता परमोत्कर्षे वर्तते। ऋतुविज्ञानकेन्द्र-शिमलायाः अनुसारम्, आगामिषु कतिपयेषु दिनेषु प्रदेशे साहाय्यस्य आशा नास्ति।

### १२ तः १६ जुलाई पर्यन्तं पूर्वानुमानम्-

ऋतुविज्ञानविभागेन १२ तः १६ जुलाई पर्यन्तं राज्यस्य अधिकांशभागेषु मन्दतः मध्यमा वृष्टिः तथा च मण्डी, कुल्लू, काङ्गड़ा, चम्बा सदृशेषु मण्डलेषु केषुचित् स्थानेषु अधिकतः अत्यधिकवृष्टेः सचेतना प्रसारिता। विशेषरूपेण स्तनित- विद्युत्पातेन सह ३० तः ४० किलोमीटर प्रतिघण्टा वेगेन तीव्रवायूनां चलनस्य अनुमानं वर्तते। किन्नौर- लाहौलस्पीति सदृशेषु उच्चपर्वतीयक्षेत्रेषु अपि सचेतना अस्ति।

### विगत-२४ होराणां स्थितिः

राज्यस्य जोगिन्द्रनगरे सर्वाधिक ६ सेन्टीमीटर, मनाल्यां ५ सेन्टीमीटर, सराहनक्षेत्रे च ४ सेन्टीमीटर वृष्टिः अङ्किता। सुन्दरनगरे अधिकतमं तापमानं ३३ डिग्री तत्रैव कुकमुसेरीक्षेत्रे न्यूनतमं तापमानं १०.१ डिग्री सेल्सियस अभवत्।

### प्रशासनस्य आह्वानम् अनावश्यकयात्रां वर्जयेयुः-

१. ऋतुविज्ञानविभागेन त्रयाणां राज्यानां स्थानीयप्रशासनेन च अतिवृष्टियुक्तेषु क्षेत्रेषु स्थानीयभूस्खलनं, जलमग्नता (जलभराव), पिच्छिलमार्गाः, न्यूनदृश्यता च प्रति सचेतितम् अस्ति।
२. सर्वसामान्याः पर्यटकाश्च दृढतया आग्रहिताः यत् ते नदी-उपनदीभ्यः सङ्कटपूर्ण- पर्वतीयप्रवणेभ्यश्च दूरे तिष्ठेयुः।
३. अतीव आवश्यकतां विना पर्वतीयक्षेत्राणां यात्रां न कुर्युः।
४. कस्यामपि आपत्स्थितौ रक्षणाय स्थानीयप्रशासनेन प्रसारितानां दिशानिर्देशानां दृढतया अनुपालनं कुर्युः।



## विनोदकणिका

{१} स्थानः पुणेनगरी
**वैद्यः-** पितृव्या श्रोतुम् असमर्था वा?
**पितृव्यः-** सा श्रोतुं न शक्नोति, इति नूतनम् अस्ति। परन्तु, सा मम वचनं न शृणोति, पञ्चाशत (५०)वर्षाणि अभवन्।

{२} **पत्नी-** 😊 एतौ पञ्चाशत (५०) रुप्यकाणां नोटद्वयं गृहीत्वा पञ्चाशत् रुप्यकाणां पलाण्डू तथा च पञ्चाशत् रुप्यकमूल्यस्य आलूकम् आनयतु।
पतिः- 🤔 किञ्चित्कालानन्तरं पुनः आगतः- तथा च पृष्टवान्, पलाण्डूनाम् रुप्यकम् कतरत्?
भीताः पुरुषाः किमन्यत्? 😱
😂 😀

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य एकं विचित्रं वृत्तं मया श्रुतम्। तुरुष्कदेशस्य अध्यक्षेण नेटो-सङ्घस्य नेतृभ्यः उपहाररूपेण सज्जाः गोलिकाः लघु- अग्न्यस्त्राणि च दत्तानि।
**काव्या-** नमस्ते नन्दिनि। तत् वृत्तं मया अपि पठितम्। कः एतादृशं भयङ्करम् उपहारं ददाति? एतेन उपहारग्रहीतारः नेतारः कष्टं प्राप्तवन्तः सन्ति। अस्तु, इदानीं पादकन्दुक-क्रीडायाः एका विचित्रा वार्ता कथ्यते। अमेरिकादेशे आयोजितायां विश्वक्रीडायां कन्दुकः उपरितनेन आकाश- चित्रक- सूत्रेण ताडितः।
**नन्दिनी-** सत्यम्, तस्य कन्दुकस्य ताडनेन क्रीडकाः भ्रमिताः जाताः। सा क्रीडा 'आकाशसूत्रस्य लीला' इति नाम्ना इदानीं प्रसिद्धा जाता अस्ति। अपरं वृत्तं शृणु। आङ्ग्लदेशे एका महिला महता भाग्येन द्वादश-नियुत-मूल्यकं भाग्यपत्रं प्राप्तवती अस्ति। किन्तु तस्याः मात्रा तत् भाग्यपत्रं निरर्थकम् इति मत्वा अवकरकण्डोले क्षिप्तम्।
**काव्या-** हा कष्टम्! एतादृशं बहुमूल्यं भाग्यपत्रम् अवकरे क्षिप्तम्! एतत् ज्ञात्वा सा महिला नितरां दुःखिता जाता। अस्तु, अन्तिमं वृत्तं शृणु। इटली-देशस्य छात्रैः कागदैः एकं विशालं विमानम् रचितम्। तत् केवलं कागदेन लेपेन च निर्मितम्।
**नन्दिनी-** आः आश्चर्यम्! तत् विमानम् आकाशे पञ्चाशत्-मीटर-पर्यन्तम् उड्डीनम्। छात्रैः नूतनः विश्वविक्रमः स्थापितः अस्ति। एतानि विचित्राणि वृत्तानि अद्य अस्माभिः ज्ञातानि। श्वः पुनः मेलिष्यामः। धन्यवादः।

# कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये १५ जुलाई दिनाङ्के 'महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्कार' समारोहः

## संस्कृतभाषायाः भारतीयज्ञानपरम्परायाश्च राष्ट्रिय-अन्तर्राष्ट्रियविदुषां भविष्यति सम्मानम्




- **कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये १५ जुलाई दिनाङ्के 'महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्कार' समारोहः।**
- **संस्कृतभाषायाः भारतीयज्ञानपरम्परायाश्च राष्ट्रिय-अन्तर्राष्ट्रियविदुषां भविष्यति सम्मानम्**

हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे नागपुरम्।कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयद्वारा प्रतिवर्षं पं. रामनारायण शर्मा वैद्यमहोदयस्य स्मृतौ पं. रामनारायण शर्मा आयुर्वेद-अनुसन्धानप्रतिष्ठानस्य, स्थानीय- मण्डलाप्रशासनस्य, महाराष्ट्र- पर्यटनविकास- मण्डलस्य (नागपुरम्) संयुक्ततत्त्वावधाने 'महाकवि कालिदास संस्कृतव्रती राष्ट्रीयपुरस्काराः' प्रदीयन्ते। समाजे संस्कृतभाषां गौरवपूर्णं स्थानं प्रापयितुम् अमूल्यं योगदानं प्रदातृभ्यः महान् विभूतिभ्यः विश्वविद्यालयपक्षतः एषः प्रतिष्ठितः पुरस्कारः प्रदीयते।वर्ष २०२३, २०२४ तथा २०२५ तमवर्षाणां कृते 'महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्काराः' आषाढमासस्य प्रथमदिवसस्य शुभे अवसरे बुधवासरे, १५ जुलाई २०२६ दिनाङ्के प्रातः ११:०० वादने रामटेकक्षेत्रे एकेन विशेषसमारोहेण महाकविकालिदासदिवसस्य उपलक्षणे विशिष्टातिथीनां करकमलैः प्रदास्यन्ते। एते पुरस्काराः तिसृषु श्रेणीषु- अन्तर्राष्ट्रिय- संस्कृतविद्वान्, वरिष्ठसंस्कृतविद्वान् तथा च युवासंस्कृतविद्वान् इति श्रेणीषु प्रदीयन्ते।

समारोहस्य अध्यक्षतां विश्वविद्यालयस्य माननीयाः कुलपतयः डॉ. अतुलवैद्यमहोदयाः विधास्यन्ति। विश्वविद्यालयस्य संस्थापकाः कुलपतयः डॉ. पंकजचान्देमहोदयाः मुख्यातिथिरूपेण तथा च प्रो. गणपतीयादवमहोदयाः (पूर्वकुलपतयः, आईसीटी विश्वविद्यालयः, मुम्बई) विशिष्ट-अतिथिरूपेण उपस्थिताः भविष्यन्ति। बैद्यनाथसंस्थायाः निदेशकाः डॉ. सुरेशशर्मामहोदयाः, महाराष्ट्र- पर्यटनविकासमण्डलस्य वरिष्ठाः प्रादेशिकप्रबन्धकाः दिनेशपाटीलवर्याः विशेषातिथयः भविष्यन्ति। संस्कृत- संस्कृतेतर-भाषासङ्कायस्य अधिष्ठात्री प्रो. कविताहोलेमहोदया कुलसचिवः डॉ. रोशन-अलोनेमहोदयश्च अपि मञ्चासीनाः स्थास्यन्ति।

### महाकवि कालिदास संस्कृतव्रती राष्ट्रीय पुरस्कारः – २०२३, २०२४ एवं २०२५

विविधश्रेणीषु पुरस्कृताः विद्वांसः अधोनिर्दिष्टसारण्यां प्राप्यन्ते-

### पुरस्कारश्रेणीपुरस्कृतविद्वांसः विदुष्यश्च

### अन्तर्राष्ट्रियसंस्कृतविद्वच्छ्रेणी

१. प्रो. चाँदकिरण सलूजा (संस्कृत-शिक्षाशास्त्रयोः अन्ताराष्ट्रियख्यातिप्राप्तविद्वान्, सदस्यन्यासी एवं शिक्षाविद् निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली)
२. प्रो. सरोजा भाटे, पुणे (संस्कृतव्याकरणस्य प्राच्यविद्यायाश्च अन्ताराष्ट्रियख्यातिप्राप्ता विदुषी, अध्यक्षा, प्रज्ञापाठशाला, वाई)
३. प्रो. माधव देशपांडे, कैलिफ़ोर्निया (संस्कृतव्याकरण-भाषाशास्त्र- संस्कृत- प्राकृतभाषाणां विशेषज्ञः, मिशिगनविश्वविद्यालयस्य पूर्वप्राध्यापकः, अमेरिका)

### ज्येष्ठ (वरिष्ठ) संस्कृतविद्वच्छ्रेणी

१. श्रीनन्दकिशोर पत्तरकिने (संस्कृतपत्रकारिता-भारतीयज्ञानपरम्परा- प्राच्यविद्याक्षेत्रेषु उल्लेखनीययोगदानाय प्रख्यातविद्वान्, पूर्वसम्पादकः, 'संस्कृत भवितव्यम्', नागपुरम्)
२. प्रो. कालुरी हनुमंत राव (संस्कृतस्य सुप्रसिद्धविद्वान्, सिकन्दराबादः)
३. प्रो. कृष्णकांत शर्मा (भारतीयदर्शनशास्त्रस्य विशेषज्ञः, पूर्वप्राध्यापकः, बनारस हिन्दू विश्वविद्यालयः, वाराणसी)

### युवासंस्कृतविद्वच्छ्रेणी-

१. डॉ. रामकृष्ण पेजथाय (संस्कृतसाहित्य- ज्योतिष-भारतीयज्ञानपरम्पराणां तथा अष्टावधानकलायाः संरक्षणे उल्लेखनीय- योगदानाय, चाणक्यविश्वविद्यालयः, बेङ्गलूरु)
२. प्रो. वीरनारायण पांडुरंगी (वेदभाष्यकारः, भारतीयदर्शनशास्त्रस्य विद्वान्, पूर्णप्रज्ञपाठशालायाः निदेशकः, बेङ्गलूरु)
३. डॉ. सचिन कठाळे (संस्कृतप्रचार-प्रसारस्य अग्रणी, 'संभाषणसंदेशः' पत्रिकायाः सम्पादकः, नागपुरम्)

### पुरस्कारराशिः सम्मानञ्च-

अस्य पुरस्कारस्य अन्तर्गतम् अन्ताराष्ट्रिय-संस्कृतविद्वच्छ्रेण्याः तथा वरिष्ठसंस्कृतविद्वच्छ्रेण्याः प्रत्येकस्मै पुरस्कारविजेत्रे ₹५०,००० (पञ्चाशत्सहस्ररूप्यकाणि) युवासंस्कृतविद्वच्छ्रेण्याः प्रत्येकस्मै पुरस्कारविजेत्रे ₹२५,००० (पञ्चविंशतिसहस्ररूप्यकाणि) पुरस्कारराशिः, सम्मानपत्रं, शालवस्त्रं, श्रीफलं च प्रदास्यते।

## संस्कृतभारत्याः पटियालाविभागस्य परिवारसम्मेलनं सम्पन्नम्

हिमसंस्कृतवार्ताः- अजय कुमार आर्य, पटियाला। पञ्जाबप्रदेशे उत्तरक्षेत्रसांस्कृतिककेन्द्रस्य परिसरे पटियालाविभागसम्मेलनस्य आयोजनं जातम्, यत्र संस्कृतभारत्याः प्रान्त- क्षेत्र- नगरकार्यकारिणीनां संस्कृतानुरागिपरिवारजनानां च सहभागिता अभवत्। तत्र पञ्जाबस्य अध्यक्षस्य वीरेन्द्रकुमारस्य, मन्त्रिणः अजयकुमार आर्यस्य, प्रान्तप्रचारप्रमुखस्य डॉ. ओमनदीपस्य, पटियालाविभागसंयोजकस्य गगनदीपपाठकस्य, पटियालाजिलामन्त्रिणः रविदत्तवर्यस्य च परिवारजनानां सह सहभागिता अभवत्।

**सम्मेलनस्य उद्देश्यानि-** अस्य परिवारसम्मेलनस्य अनेकानि उद्देश्यानि आसन्। प्रथमम्, संस्कृतकार्ये संलग्नानां कार्यकर्तॄणां परिवारजनानां च मध्ये परस्परपरिचयः स्नेहसम्बन्धश्च वर्धेत, इति। द्वितीयम्, कार्यकर्तॄणां परिवाराः अपि संस्कृतभारत्याः कार्ये स्वस्य सहभागितां अनुभवेयुः, येन कार्यकर्तृषु उत्साहः वर्धेत, परिवारजनाश्च संस्कृतकार्यं स्वकीयं मन्यन्ते। तृतीयम्, विभिन्नस्थानेभ्यः आगतानां कार्यकर्तृपरिवाराणां मध्ये सौहार्दं सहकार्यभावश्च प्रवर्धेत, यतः संस्कृतभाषायाः प्रचारकार्यं दीर्घकालपर्यन्तं निरन्तरं चालयितुं परिवाराणां सहयोगः अत्यावश्यकः भवति।

### परिवारेण सह मेलनस्य आवश्यकता-

इत्यनुभूयते यत् संस्कृतकार्यकर्तारः बहुधा स्वकार्ये एव व्यस्ताः भवन्ति, येन परिवारजनैः सह पर्याप्तः समयः न लभ्यते। अतः एतादृशानि सम्मेलनानि कार्यकर्तृभ्यः स्वपरिवारजनैः सह गुणवत्तापूर्णं समयं यापयितुम् अवसरं ददति। यदा परिवारजनाः अपि संस्कृतभारत्याः कार्यक्रमेषु सम्मिलिताः भवन्ति, तदा ते संस्कृतकार्यस्य महत्त्वं गभीरतया अवगच्छन्ति, कार्यकर्तॄणां परिश्रमं च सम्यक् जानन्ति। एवं परिवारस्य समर्थनेन कार्यकर्ता उत्साहपूर्वकं दीर्घकालं यावत् कार्ये संलग्नः भवितुं शक्नोति। अस्मिन् सम्मेलने मक्खनलालसिंगलवर्यस्य, मक्खनजैनवर्यस्य, छज्जुराममहोदयस्य च विशेषोपस्थितिः आसीत्।